# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2020, held in 2021

## SANACOR05T-SANSKRIT (CC5)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं प्रश्नस्य एकस्योत्तरं लेख्यम्। 10

(क) भासकृतस्य 'स्वप्नवासवदत्तमि'ति नाटकस्य प्रथमाङ्के वर्णितस्य ब्रह्मचारि– वृत्तान्तस्य उपयोगो लिख्यताम्।

(ख) पद्मावतीवासवदत्तयोः चरित्रयोः तुलनात्मिका आलोचना कर्तव्या।

2. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत – 5

(क) प्रद्वेषो बहुमानो वा संकल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता॥

(ख) यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्यात् विभ्रमो ह्यस्तु मे चिरम्॥

3. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेया। 2×5 = 10

(क) 'स्वप्नवासवदत्तम्' इति ग्रन्थः संस्कृतसाहित्यस्य कस्यां श्रेण्यामन्तर्भूतः ? तत्र कति अङ्काः सन्ति ?

(ख) 'स्वप्नवासवदत्तम्' इति नाटकस्य नायिकानायकौ कौ स्तः ? अत्र विदूषकस्य नाम किम् ?

(ग) 'स्वप्नवासवदत्तम्' इति पदस्य व्युत्पत्तिः का ?

(घ) राजा उदयनो घोषवतीति वीणां कस्यै दत्तवान् ? तस्या वीणाया वैशिष्ट्यं किमासीत् ?

(ङ) विदूषकात् पद्मावत्याः शिरःपीडायाः संवादं ज्ञात्वा राज्ञ उदयनस्य मनसि कीदृशी प्रतिक्रिया सञ्जाता ?

(च) पद्मावती का ? कथं सा तपोवनमगच्छत् ?

(छ) यौगन्धरायणः कस्याः हस्ते कां न्यासरूपेण दत्तवान्।

### SECTION-B

4. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। 10

(क) 'अभिज्ञानशकुन्तलम्' इति नाटकस्य पञ्चमाङ्के हंसपदिकायाः सङ्गीतस्य नाटकीयतात्पर्यं विचार्यताम्।

(ख) कर्तव्यनिष्ठनृपरूपेण, आदर्शप्रेमिकरूपेण, मातृभक्तपुत्ररूपेण सन्तानवत्सल– पितृरूपेण च दुष्यन्तस्य चरित्रवैशिष्ट्यं पर्यालोच्यताम्।

5. अधोलिखितेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागरीलिप्या च व्याख्या कार्या। 5×3 = 15

(क) शान्तमिदमाश्रमपदं स्फुरति च वाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सवित्र॥

(ख) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(ग) अनाघ्रातं पुष्पं किसलयमलूनं कररुहै–
रनाविद्धंरत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥

(घ) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा॥

(ङ) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥

अथवा

अधोलिखितेषु विषयत्रयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टिप्पणी लिख्यताम्। 5×3 = 15

सूत्रधारः, विष्कम्भकः, मारीचः, सर्वदमनः, धनमित्रः, करभकः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——